# Pishachamochana Stotram

# પિશાચમોચનસ્તોત્રમ્

## Document Information

Text title : Pishachamochana Nrisimha Stotram

File name : pishAchamochanastotram.itx

Category : vishhnu, dashAvatAra, stotra, narasiMhapurANa, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa, narasiMhapurANa | adhyAya

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# પિશાચમોચનસ્તોત્રમ્

શ્રીગણેશાય નમઃ । શ્રીલક્ષ્મીનૃસિંહાય નમઃ ।
વિશુદ્ધમજમાનન્દમેકમાત્રમખણ્ડિતમ્ ।
સચ્ચિન્માત્રં પરં શાન્તં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧॥

યદ્ભાસા નિખિલં ભાતિ યસ્ય નાન્યત્પ્રકાશકમ્ ।
પુરાણમવ્યયં જ્યોતિં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૨॥

યદેકં સર્વભૂતેષુ પ્રતિરૂપતયા સ્થિતમ્ ।
જ્યોતિર્યથોદપાત્રેષુ તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૩॥

યદન્તઃ સર્વભૂતાનાં યદ્રૂપમબાધિતમ્ ।
મેવાભરણાદીનાં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૪॥

યદેકં સર્વભાવાનાં નિરન્તરમદૂષિતમ્ ।
ચિન્માત્રં નિષ્કલં પૂર્ણં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૫॥

યે નાર્થાન્ભજતે જન્તુઃ ઇન્દ્રિયેષુ મનસ્યપિ ।
નિરહઙ્કારમાનન્દં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૬॥

યન્મનો મનસાં પ્રાણઃ પ્રાણાનામિન્દ્રિયં વરમ્ ।
સર્વાત્મકમખણ્ડં સત્તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૭॥

યન્નામગુણરૂપાદ્યૈઃ વિચિત્રમણિસર્વગમ્ ।
નીયતે પશુબુદ્ધીનાં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૮॥

યસ્માદુદેતિ સદ્વિશ્વં યેન જીવતિ વર્ધતે ।
યસ્મિન્ પ્રલીયતે સર્વં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૯॥

યતો વાગાદયા ભાવાઃ ઉત્થિતાઃ સ્વસ્વકર્મસુ ।
પ્રવર્તન્તે સાક્ષિરૂપાત્ તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૦॥

યદ્ ગ્રાસકં ગ્રાસકાણાં વીરાણાં ચ વિવર્ધનમ્ ।

વ્યાપકં વ્યાપકાનાં ચ તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૧॥

સકલં નિષ્કલં વ્યોમ માયાતીતં નિરઞ્જનમ્ ।
અસ્તિનાસ્તિદ્વયાતીતં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૨॥

યજ્જ્વાલયતિ કાલાદ્યાસ્તમો યેન પ્રકાશતે ।
મહાજ્વાલાતમોરૂપં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૩॥

યત્સર્વતો વદનવત્સર્વતઃ કરણાચ્છિરઃ ।
સર્વતો નયનશ્રોત્રં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૪॥

યદ્વિચારવતો નૃણાં બન્ધોઽનાદિ તમોભવઃ ।
સદ્યો નશ્યતિ શારીરસ્તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૫॥

યસ્યાજ્ઞયાનિલાર્કેન્દુમૃત્યુવહ્નિગ્રહાદયઃ ।
સ્વકર્મસુ વર્તન્તે તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૬॥

યન્નામ મઙ્ગલતમં મઙ્ગલાનામનુત્તમમ્ ।
સ્તુતિભિઃ સ્તૂયતે વેદૈસ્તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૭॥

યસ્યાઽત્મતાં વિદાં મૃત્યુરનાદિ મ્રિયતે ક્ષણાત્ ।
મૃત્યુમારણમાપૂર્ણં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૮॥

નિષિધ્ય સર્વલોકેઽસ્મિન્ યચ્છેષમુપલભ્યતે ।
સત્તામાત્રમનિર્દેશ્યં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૯॥

પૂર્ણમન્તં બહિઃ પૂર્ણં યેન પૂર્ણેન પૂર્યતે ।
પૂર્ણસ્ય પૂર્ણમાકાશં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૨૦॥

ઉગ્રં વીરં મહાવિષ્ણું જ્વલન્તં સર્વતો મુખમ્ ।
નૃસિંહં ભીષણં ભદ્રં મૃત્યુમૃત્યું નમામ્યહમ્ ॥ ૨૧॥

ઇતિ નૃસિંહપુરાણે શિવપાર્વતીસંવાદે પિશાચમોચનસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by M K Barman

*Pishachamochana Stotram*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*